संस्कृत.

क्र. २४

स्मार्त

संस्कार.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(१)

अथप्रवासागतेपुत्रे पितरिवा पुत्र
दर्शनेसवितुरेवनेमित्तिकं कर्म॥
पितापुत्रमभिमशति॥ सोमस्य
त्वाद्युम्नेनाभिमशामि॥ अग्नेस्ते
जसा सूर्यस्य वर्चसा॥ मूर्धाघ्रा
पयति॥ पशूनां त्वाहुंकारेणाभि
जिघ्रामि अयुषेहुं॥ ततःस्वदक्षि
णेनहस्तेन पुत्रस्य दक्षिणंहस्तं
सांगुष्ठं गृह्णाति॥ अग्निरायुष्मा
न्‌॰ सोम॰ यज्ञ॰ ब्रह्मायु॰
देवा अयु॰ अयुर्दे॰ अग्ने॰ ततो
मंत्रद्वयं पुत्रस्य पुत्रस्य दक्षिणेक
र्णे जपति॥ अयुर्दा अग्ने॰ अग्ने
पृथि॰ उत्तरे कर्णे जपति॥
अयुर्वर्धनप्रयोगः॥ देशकालौ स
कीर्त्य मम ब्दिफूर्ति जन्मदिवसेअ
युरभिवृद्धि द्वारा श्रीपरमेश्वरप्री
त्यर्थं असुकजन्मनक्षत्रदेवताकंस्था
लिपाकं करिष्ये॥ तदंगं गण॰पु॰मा॰
नां॰ उदूनादि भूसंस्कारं विधाय॥
बलवर्धननामानं ओपासनाग्निं प्र
तिष्ठाप्य॥ श्रद्धाएहीसादिप्राणायाम॰

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)



अमुकवर्धापनहोमकः प्रधानहोमः ॥
अमुकनक्षत्रनदेवताश्च अमुकसं
ख्ययाचरुणायक्ष्ये अग्रहोमादिव्या
हृत्यंतंमुक्ता ॥ अष्टोत्तरशतमष्टावि
शतिसख्यया वाहुत्वाहोमशेषंस
माप्य ॥ स्वजन्मनक्षत्रंतदेवताचंद्र
वरुणंचसंपूज्य ॥ अभिषेकः ॥ ब्रा
ह्मणभोजनंदक्षिणांदत्वा ॥
चतुर्थेषष्ठेवामासेशुक्लपक्षेशुभतिथ्यां
देशकालौसंकीर्त्य ममशिशोर्वाभ
(युराभिवृद्धिद्वाराबीजगर्भसमुद्
वैनोनिर्बर्हणद्वाराश्रीपरमेश्वरप्री
त्यर्थंसूर्यावलोकननिष्क्रमणंचक
रिष्ये ॥ तदंगं पु मा ना करिष्ये
इंद्रंअग्निंयमंनैऋतिंवरुणवायुकु
बेरंईशानंप्राच्यायष्टदिक्पालानां
चंद्रार्कौवाप्यादिदेवानांयथाक्रमं
पूजांकृत्वा ॥ ब्राह्मणान्संभोज्य ॥
अग्निंचंद्रधेनुनार्दर्शनंकृत्वामंत्रा
न्पठेत् ॥ चंद्रार्कौयोदिगीशानः
शिशुरक्षणार्थंदेवांस्तत्राभ्यर्च्य ॥ विष्णु
शिवालयेवाबंधुगृहंगत्वा ॥ देवपुष्पो
पहारादिभिःसंपूज्य गोमयाच्चतुर
स्रेचतुरस्रेधान्यांनिधायतदुपरिशि

(3) शुमादाय मंत्रेण रक्षां कुर्यात् ॥ ओं ॥
जूंसः ॥ त्र्यंबकंय० सः हूं जुं ॥ इत्ये
वं रूपमस्तु सं जिनन मंत्र पठेत् ॥ वि
भुति रक्षा त्वा वा मुर्ध्नि ललाटे रक्षा क
त्वा ॥ ब्राह्मण भोजनं दक्षिणां दत्वा
इति निष्क्रमणं ॥

अथ षष्ठाष्टमे वा मासे अन्नप्राशनं
कार्यं ॥ देशकालौ स कीर्त्य ममास्य
शिशोः मातृ गर्भ प्राशनेनो गर्भ वि
जगर्भस मुद्भव नो निर्बर्हण द्वारा
न्ना घ ब्रह्मवर्चस तेज इंद्रियायु
र भिवृद्धि द्वारा श्री परमेश्वर प्री
त्यर्थं अन्न प्राशनाख्यं कर्म करि
ष्ये ॥ तदंग ग० पु० मा० नांदीः
इति संकल्प्य ॥ उक्त रीत्या कुर्यात् ॥
उद्धननादि भूसंस्कारं विधाय ॥ ओ
पासनमग्निं प्रतिष्ठाप्य ॥ शुचि ना
मानमग्निं संस्थाप्य ॥ ध्यात्वा च
क्षुषी आज्येनेत्यादि प्राणा ० अन्नप्रा
शन होम० नात्र वैशेषिक प्रधा
नः ॥ अंग होमादि संस्था जपां
त कर्म समाप्य ॥

स्वदक्षिणं मातुरुत्संगस्थं शिशुं द
धिमधुघृतं त्रिवृत्सिश्रं कृत्वामंत्रत्र
येणेकवरं प्राशयति ॥ भूस्त्वयिद
धामि ॥ भुवः स्त्वयिदधामि ॥ ॥ सु
वःस्त्वयिदधामि ॥ एकवारंप्राश
यति ॥ अपां त्वोषधीनां रसं प्राश
यामि ॥ शिवास्तअपओषधयोभ
वंत्वनमीवास्त्यअपओषधयोभ
वंतु ॥ नात्र स्तामः मुखं प्रक्षाल्य बा
लकं भुमावुपवेशयेत् तदग्रे पुस्तक
वस्त्रादि शिल्पादि विन्यस्य स्वेच्छ
याग्राशुस्पर्शयेत् ॥ ततः कर्मां
गत्वेनयथाशक्ति ब्राह्मणभोज
नं दक्षिणादत्वा ॥ ॥ इति अ
न्नप्राशनप्रयोगसमाप्तः ॥ ॥
शके १७६३ प्लवनामसंवत्सरे ज्ये
ष्ठकृष्णप्रतिपत्तिथौ इदंपुस्त
कं गोरवलेइत्युपनामसदा
शिवभटात्मजविष्णुभटेन लिखि
तं ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लि
खितं मया ॥ यदि शुद्धमशुद्धं वा
मम दोषो न विद्यते ॥ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com